कन्दितव्यम् , कन्दयितव्यम् , चिकन्दिषितव्यम् , चाकन्दितव्यम् ;
कन्दनीयम् , [1]कन्दनीयम् , चिकन्दिषणीयम् , चाकन्दनीयम् ;
कन्द्यम् , कन्द्यम् , चिकन्दिष्यम् , चाकन्द्यम् ;
ईषत्कन्दः-दुष्कन्दः-सुकन्दः ; — —
कन्द्यमानः, कन्द्यमानः, चिकन्दिष्यमाणः, चाकन्द्यमानः ;
कन्दः, कन्दः, चिकन्दिषः, चाकन्दः ;
कन्दितुम् , कन्दयितुम् , चिकन्दिषितुम् , चाकन्दितुम् ;
[2]कन्दा, कन्दना, चिकन्दिषा, चिकन्दयिषा, चाकन्दा ;
कन्दनम् , कन्दनम् , चिकन्दिषणम् , चाकन्दनम् ;
कन्दित्वा, कन्दयित्वा, चिकन्दिषित्वा, चाकन्दित्वा ;
सङ्कन्द्य, सङ्कन्द्य, प्रचिकन्दिष्य, प्रचाकन्द्य ;

| | | | |
|---|---|---|---|
| कन्दम् २, कन्दित्वा २, | कन्दम् २, [3]कान्दम् २, कन्दयित्वा २, | चिकन्दिषम् २, चिकन्दिषित्वा २, | चाकन्दम् २ ; चाकन्दित्वा २. |

## (165) "कनी दीप्तिकान्तिगतिषु" (I-भ्वादिः-460. सक. सेट्. पर.)

दीप्तिः=प्रकाशः, कान्तिः=शोभा—इति क्षीरस्वामी ।

कानकः-निका, कानकः-निका, चिकनिषकः-षिका, [4]चङ्कनकः-निका ;
कनिता-त्री, कानयिता-त्री, चिकनिषिता-त्री, चङ्कनिता-त्री ;
[A]कनन्-न्ती, कानयन्-न्ती, चिकनिषन्-न्ती ; —
कनिष्यन्-न्ती-ती, कानयिष्यन्-न्ती-ती, चिकनिषिष्यन्-न्ती-ती ;

---

1. 'णेरनिटि' (6-4-51) इति णेर्लोपः ।
2. घटादीनां षित्त्वात् 'षिद्भिदादिभ्यः—' (3-3-104) इति अङ् । 'गुरोश्च—' (3-3-103) इति वा अः प्रत्ययः ।
3. अनुपधात्वेऽपि घटादिषु पाठसामर्थ्यात् 'चिण्णमुलोः—' (6-4-93) इति दीर्घविकल्पः ।
4. 'नुगतोऽनुनासिकान्तस्य' (7-4-85) इति अभ्यासस्य नुक् ।

A. 'ध्वणच्छिशून् धाणसमोणिताशुभान् शोणान् पृथुश्रोणिजनो दुदोह च ।
प्रश्लोणितान् प्रैणनविप्रणत्क्षितीन् अनुल्बणान् धेनुगणान् कनत्स्तनात् ॥' धा. का. 1-59.